## ग्रहलाघवम्
## शास्त्री-III

06.10.20
1

अथ शीघ्र-मन्दफलयोर्ग्रहे संस्कारप्रकारः —

प्राङ्मध्यमे चलफलस्य दलं विदध्यात्-
तस्माच्च मान्दमखिलं विदधीत मध्ये।
क्राक्केन्द्रकेऽपि च विलोममतश्च शीघ्रं
सर्वे च तत्र विदधीत भवेत्स्फुटोऽसौ ॥

अन्वयः— प्राक् चलफलस्य दलं मध्यमे विदध्यात्। तस्मात् मान्दं अखिलं मध्ये विदधीत, अपि च क्राक्केन्द्रके विलोमं, अतः शीघ्रं सर्वं तत्र विदधीत, असौ स्फुटः भवेत्।

तद्यथा- प्राक् प्रथमं, चलफलस्य शीघ्रफलस्य, दलम् अर्धम्, मध्यमे मध्यमग्रहे, विदध्यात्। अत्र विवेकः- चेद् धनफलं तदा ग्रहे युक्तम्, ऋणफलं चेद् ग्रहे न्यूनं कर्तव्यम्। तस्मात् प्रदत्तशीघ्रफलात्, मान्दं मन्दफलं, साधनीयम्। तद् अखिलं समग्रं मध्ये मध्यग्रहे, विदधीत कुर्वीत, अपि च तन्मन्दफलं, क्राक्केन्द्रके शीघ्रकेन्द्रे, विलोमं (ऋणं चेद् धनं, धनं चेद् ऋणम्) कर्तव्यम्। अतः शीघ्रं फलं साध्यं भवति, तत् सर्वं तत्र मध्यमफलसंस्कृतमध्यमग्रहे, विदधीत। तदाऽसौ स्फुटः स्पष्टग्रहो भवेत्।

भावार्थः- सर्वप्रथम अपने इष्ट ग्रह के शीघ्रफल का आधा करके पूर्वोक्त रीति से उसको अहर्गणोत्थ मध्यमग्रह में धन अथवा ऋण करें। तब जो राश्यादि प्राप्त हो, उससे मन्दफल सिद्ध करें। उस मन्दफल को अहर्गणोत्थ मध्यमग्रह में पूर्वोक्त रीति से इसमें भी ऋण अथवा धन करें और उस मन्दफल को शीघ्रकेन्द्र में धन अथवा ऋण करें। यदि पहले धन किया हो, तो इस बार ऋण करें। यदि पहले ऋण किया हो, तो इस बार धन करें। इस प्रकार जो मन्दफलसंस्कृतशीघ्रकेन्द्र हो, उससे शीघ्रफल का साधन करें। इस शीघ्रफल को मन्दफलयुक्त मध्यमग्रह में जोड़ देने पर ग्रह स्पष्ट हो जाता है।

06.10.20
2

अथ कुजादीनां मन्दस्पष्टगतिसाधनप्रकारः —

मान्दाङ्कान्तरमार्क्यसृग्गुरूणां भक्तं बाणनगैः शरैः खरामैः।
विद्भृग्वोर्द्विहतेषु भाजितं तद्दद्यात्प्राग्वदितौ मृदुस्फुटा सा ॥

अन्वयः — आर्क्यसृग्गुरूणां मान्दाङ्कान्तरं बाणनगैः, शरैः खरामैः, भक्तं विद्भृग्वोः, द्विहतेषु भाजितं, तत् प्राग्वत् इतौ दद्यात्, सा मृदुस्फुटा।

तत्र — आर्क्यसृग्गुरूणां आर्किः शनिः, असृक् भौमः, गुरुः बृहस्पतिः, एतेषां मान्दाङ्कान्तरं मन्दफलसाधने यद् गतेर्यान्तरं तत्, क्रमेण बाणनगैः पञ्चसप्तत्या, शरैः पञ्चभिः, खरामैः त्रिंशता, भक्तं भाजितं, विद्भृग्वोः बुधशुक्रयोः, मान्दाङ्कान्तरं भवति, द्विहतं द्वाभ्यां गुणितम्, इषुभाजितं पञ्चभिर्भक्तं, कलाद्यं मन्दगतिफलम् भवति, तत् गतिफलं, प्राग्वत्-द्वितीयाधिकारोक्तस्याष्टमश्लोकानुसारं इतौ मध्यमगतौ, दद्यात्, सा मृदुस्फुटा मन्दस्पष्टा, गतिः भवति।

अत्रायं विवेकः — कर्कादारभ्य धनराशिपर्यन्तं क्रमेण फलस्योपचयाद् धनम् एवञ्च मकरराशिमारभ्य मिथुनराशिपर्यन्तं क्रमेण गतिफलस्यापचयाद् ऋणमिति।

भावार्थः — शनि, मंगल और बृहस्पति के मन्दफल साधन के अवसर पर जो मन्दांको के अन्तर प्राप्त हुए थे, उनमें से शनि के मन्दांक के अन्तर में बाण ५ नग ७ = ७५ का भाग दें। मंगल के मन्दांक के अन्तर में ५ का भाग दें। गुरु के मन्दांक के अन्तर में ख० राम ३ = ३० का भाग दें और बुध एवं शुक्र के मन्दांक के अन्तर को २ से गुणा करके ५ का भाग देने पर जो लब्धि प्राप्त हो, उसको कलादि समझें। यह मन्दकेन्द्र कर्क आदि ६ राशि के भीतर हो, तो धन और मकर आदि ६ राशि के भीतर हो, तो ऋण समझें। उसके बाद कलादि लब्धि को क्रम से शनि आदि ग्रहों की मध्यगति में धन अथवा ऋण करें। तब मन्द स्पष्ट गति का साधन होता है।

06.10.20


अथ भौमादिपञ्चग्रहस्पष्टगतिसाधनप्रकारः—

भौमाच्चलाङ्कविवरं शरहृत्स्वबाण-
शाक्यं त्रिहृत्कृतहृतं द्विगुणाक्षभक्तम् ।
तद्धीनयुक्क्षयचये कु मृदुस्फुटा स्यात्
स्पष्टाऽथ चेद् बहु ऋणात्पतिता कु वक्रा ॥

अन्वयः- भौमात् चलाङ्कविवरम् शरहृत स्वबाण-शाक्यं त्रिहृत् कृतहृतं द्विगुणाक्षभक्तं, क्षयचये तद्हीनयुक् मृदुस्फुटा स्पष्टा स्यात्, अथ चेत् बहु ऋणात् पतिता वक्रा

तारा- भौमात् मङ्गलादारभ्य पूर्वोक्तानां पञ्चताराग्रहाणां चलाङ्कविवरं द्वितीयशीघ्रफलसाधने शीघ्राङ्कान्तरं तत्, क्रमेण शरहृत् पञ्चसङ्ख्यया भक्तं, स्वबाणशाक्यं निजपञ्चमांशेन युक्तं, त्रिहृत् त्रिभिर्भक्तं, कृतहृतं चतुर्भिर्भक्तं, द्विगुणाक्षभक्तं पूर्वं द्विसङ्ख्यया गुणितं पश्चात् पञ्चभिः भक्तं कर्तव्यम्। अनेन विधिना प्राप्तो लब्धिः गतेः शीघ्रफलं भवति, क्षयचये गतिफलेन हीना युक्ता च, तद् हीनयुक्, मृदुस्फुटा मन्द-स्पष्टा गतिः स्यात्, तदा स्फुटा गतिः स्यात्, अथ चेत् ऋणफलं बहु अधिकं, तदा ऋणात् शीघ्रगतिफलात्, पतिता शुद्धा कार्या, शेषं वक्रा गतिर्बोध्या।

भावार्थः— मंगल से लेकर शनि तक के पाँचों ग्रहों के द्वितीय शीघ्रफल का साधन करने के लिए शीघ्रांकों को परस्पर घटाने से जो शेष प्राप्त हुए थे, उनमें क्रमशः मंगल के शीघ्रांकों के शेष में शर ५ का भाग दें। बुध के शीघ्रांकों के अन्तर में उसके पञ्चम भाग से युक्त करें। गुरु के शीघ्रांकों के अन्तर में ३ का भाग दें। शुक्र के शीघ्रांकों के अन्तर में ४ का भाग दें और शनि के शीघ्रांकों के अन्तर को २ से गुणा करके ५ का भाग देने पर जो लब्धि प्राप्त हो उसको कलादि गति समझें।

डॉ० सुदिवर कुमार
सह० प्राचार्य (ज्योतिष)
रा०उ०सं० महावि० कुरुक्षेत्र